শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৬১

*যজ্বপত্ন্যুদ্ধরণৱর্ণনম্*

ততশ্চ ৱৃন্দাৱনতোতিদূরতো
ৱনং গতস্ত্ৱং খলু গোপগোকুলৈঃ।
হৃদন্তরে ভক্ততরদ্বিজাঙগনা-
কদম্বকানুগ্রহণাগ্রহং ৱহন্॥ ১ ॥

ততো নিরীক্ষ্যাশরণে ৱনান্তরে
কিশোরলোকং ক্ষুধিতং তৃষাকুলম্।
অদূরতো যজ্ঞপরান্ দ্বিজান্ প্রতি
ৱ্যসর্জযো দীদিৱিযাচনায তান্॥ ২ ॥

গতেষ্ৱথো তেষ্ৱভিধায তেভিধাং
কুমারকেষ্ৱোদনযাচিষু প্রভো।
শ্ৰুতিস্থিরা অপ্যভিনিন্যুরশ্ৰুতিং
ন কিঞ্চিদূচুশ্চ মহীসুরোত্তমাঃ॥ ৩ ॥

অনাদরাত্ খিন্নধিযো হি বালকাঃ
সমাযযুর্যুক্তমিদং হি যজ্বসু।
চিরাদভক্তাঃ খলু তে মহীসুরাঃ
কথং হি ভক্তং ত্ৱযি তৈঃ সমর্প্যতে॥ ৪ ॥

নিৱেদযধ্ৱং গৃহিণীজনায মাং
দিশেযুরন্নং করুণাকুলা ইমাঃ।
ইতি স্মিতার্দ্রং ভৱতেরিতা গতা-
স্তে দারকা দারজনং যযাচিরে॥ ৫ ॥

www.prapatti.com

গৃহীতনাম্নি ত্বযি সম্ভ্রমাকুলা-
　　শ্চতুৰ্ৱিধং ভোজ্যরসং প্ৰগৃহ্য তাঃ।
চিরং ধৃতত্বৎপ্ৰৱিলোকনাগ্ৰহাঃ
　　স্বকৈর্নিরুদ্ধা অপি তূর্ণমাযযুঃ॥ ৬ ॥

ৱিলোলপিঞ্ছং চিকুরে কপোলযোঃ
　　সমুল্লসৎকুণ্ডলমাৰ্দ্ৰমীক্ষিতে।
নিধায বাহুং সুহৃদংসসীমনি
　　স্থিতং ভৱন্তং সমলোকযন্ত তাঃ॥ ৭ ॥

তদা চ কাচিত্ত্বদুপাগমোদ্যতা
　　গৃহীতহস্তা দযিতেন যজ্বনা।
তদেৱ সঞ্চিন্ত্য ভৱন্তমঞ্জসা
　　ৱিৱেশ কৈৱল্যমহো কৃতিন্যসৌ॥ ৮ ॥

আদায ভোজ্যান্যনুগৃহ্য তাঃ পুন-
　　স্ত্বদঙ্গসঙ্গস্পৃহযোজ্ঝতীর্গৃহম্।
ৱিলোক্য যজ্ঞায ৱিসর্জযন্নিমা-
　　শ্চকর্থ ভর্তৃষ্ৱনপি তাস্বগর্হণান্॥ ৯ ॥

নিরূপ্য দোষং নিজমঙ্গনাজনে
　　ৱিলোক্য ভক্তিং চ পুনৰ্ৱিচারিভিঃ।
প্ৰবুদ্ধতত্ত্বৈস্ত্বমভিষ্টুতো দ্বিজৈ-
　　র্মরুৎপুরাধীশ নিরুন্ধি মে গদান্॥ ১০ ॥

**********